Postal Regd.No. GAMC- 1553/2022-2024
ISSN 2454-6313

संस्कृत-
# साम्प्रतम्
(Sampratam means "Current")

(संस्कृतमासिकी पत्रिका)
वर्ष : १९ अङ्क : २२२
ऑक्टोबर - २०२४

EKLAVYA SANSKRIT ACADEMY

Registered under RNI No. GUJMUL/2006/17235. Published on 5th of every month. Permitted to post at Ahmedabad PSO on 7th of every month under Postal Regd.No. GAMC- 1553/2022-2024 issued by SSP Ahmedabad. Valid upto 31-12-2024. containing 8 pages ₹ 10

## चिन्तनम्

सतीशः गज्जर्

### आन्तरिकं वैभवम्



श्रीमद्भगवद्गीतायां श्रीकृष्णेन नैके अपूर्वाः विलक्षणाः शब्दाः प्रयुक्ताः । तेषु एकतमः अस्ति – 'अन्तर्ज्योतिः' । यः मनुष्यः आन्तरिकं दिव्यं प्रकाशं प्राप्नोति सः अन्तर्ज्योतिः उच्यते । एतादृशः मनुष्यः अन्धकारेण न लिप्यते । प्रकाशस्य एकः रश्मिः अपि अन्धकारं दूरीकर्तुं समर्थः । यस्य हृदयं रश्मिमयं भवति तस्य जीवनं कीदृशं स्यात् ? भवतु नाम अन्तर्ज्योतिः मनुष्यः महान् ऋषिः नापि स्यात्, तथापि सः यदा गुणानां विकासं करोति तदा स्वयमेव आन्तरिकं परिवर्तनं प्राप्नोति – औन्नत्यं प्राप्नोति।

महान् चिन्तकः एरिस्टोटलवर्यः एतमेव विचारं स्वभाषया प्रस्तौति। तस्य कथनानुसारम् अन्तर्ज्योतिः मनुष्यः किञ्चित् उन्नते स्थाने विराजते। तस्य हृदयं परोपकारभावनया नितरां परिपूर्णं भवति। परोपकारः तस्मै स्वभावतः रोचते। सः उपकारस्य प्रदाने हृष्यति, किन्तु आदाने लज्जते। सत्यमेव ननु, परोपकारः सद्गुणः अस्ति। प्रत्युत उपकारस्य ग्रहणे जायमाना मतिः पराधीना वर्तते।

अन्तर्ज्योतिः मनुष्यः वचने वर्तने च ऋजुः भवति। सः प्रशंसया उन्मादं न प्राप्नोति। तस्मिन् द्वेषबुद्धिः न जायते। तितिक्षा तस्य महान् गुणः वर्तते। सः अपमानं शीघ्रं विस्मरति।

एतादृशः मनुष्यः प्रशंसाम् न अपेक्षते। परनिन्दायाः आस्वादने तस्य रुचिः नास्ति। सः तु शत्रुम् अपि न निन्दति। तस्य मुखाकृतिः सदा शान्तरसेन स्निग्धा भवति। स्वरः गभीरः भवति। वाणी संयता भवति। तस्मिन् अधीरता न दृश्यते। सः कदापि उद्वेगं न प्राप्नोति। कष्टानि च लीलया सहते।

एवम् अन्तःप्रबुद्धे जने ईश्वरीयं तेजः स्वयमेव अवतरति। ईसुः कथयति–

तथाविधाः स्यूताः क्रेतव्याः, ये कदापि न नश्यन्ति। अपि च तेषु (स्यूतेषु) तथाविधं धनं स्थापनीयं, यत् कदापि क्षीणं, नष्टं, चोरहार्यं वा न भवति।

# स्वर्णपात्रम्

**- जातककथा**



पञ्चभ्य: कल्पेभ्य: पूर्वं बोधिसत्त्व: सौरवनामके राज्ये पात्रवणिग्रूपेण कार्यं कुर्वन् जीवनं करोति स्म । स: प्राचीनानि पात्राणि क्रीत्वा नूतनानां पात्राणां विक्रयणं करोति स्म । तस्मिन् एव राज्ये तादृश: एव अन्य: वणिक् अपि आसीत् । स तु महाकृपण: । तौ उभौ अपि मिलित्वा वाणिज्यं कुरुत: स्म ।

एकदा तौ आन्ध्रपुरनामकं ग्रामं प्राप्तवन्तौ । तत्र कश्चन वणिक्परिवार: आसीत् । पूर्वं स च परिवार: सम्पन्न: आसीत् । किन्तु इदानीं निर्धन: स: । तस्मिन् एका वृद्धा तस्या: पौत्री च निवसत: । उभे अपि भृत्यवृत्त्या जीवनं यापयत: स्म ।

तस्मिन् गृहे कानिचन एव पात्राणि आसन् । एकं सुवर्णपात्रम् अपि आसीत्, यस्य च उपयोगं तस्य परिवारस्य प्रधानवणिक् स्वजीवितकाले कृतवान् आसीत् । इदानीं तु तस्य उपयोग: केनापि न क्रियते स्म । तस्मात् मालिन्यावृतम् आसीत् तद् । तस्मात् वृद्धा तस्या: स्नुषा च न जानीत: यत् तत् पात्रं सुवर्णमयम् अस्ति इति ।

कृपण: वणिक् तस्मिन् मार्गे अटन् 'पात्राणि.. पात्राणि..' इति वदन् गच्छन् आसीत् । तस्य ध्वनिं श्रुत्वा पौत्री अवदत् – "अम्ब ! मह्यं किमपि दापयतु" इति ।

"वत्से ! किं वा दापयेयम् अहम् ? विक्रेतुं योग्यं किमपि नास्ति एव गृहे । कस्यचित् विक्रयणं विना नूतनं क्रेतुम् अशक्यम्" इति अवदत् पितामही ।

"अस्माकं गृहे एकं प्राचीनं पात्रम् अस्ति खलु । तत् विक्रीय किमपि दापयतु अम्ब !" इति अवदत् पौत्री ।

तदा पितामही तं वणिजं गृहं प्रति निमन्त्रितवती । वणिजे तत् प्राचीनं पात्रं दत्त्वा – "एतत् स्वीकृत्य एतस्या: निमित्तं किमपि ददातु भो:" इति अवदत् । कृपण: पात्रं परीक्षादृष्ट्या अपश्यत् । 'एतत् सुवर्णमयम् एव' इति दर्शनमात्रेण स: अवगतवान् । तस्य मनसि दुराशा उत्पन्ना ।

कथञ्चित् एतत् अपहरणीयम् एव इति निश्चित्य स: वृद्धाम् उद्दिश्य – "भगिनि ! एतत् पात्रं सर्वथा अनुपयोगि । किमपि मूल्यं नार्हति एतत् । अत: एतत् क्रीत्वा किं वा कुर्याम् अहम् ?" इति वदन् पात्रं तत्रैव क्षिप्त्वा तत: निर्गतवान् ।

कृपणस्य वणिज: निर्गमनस्य किञ्चित्कालस्य अनन्तरं बोधिसत्त्व: तं मार्गं प्रविश्य वृद्धाया: गृहस्य समीपमपि गत्वा 'पात्राणि.. पात्राणि..' इति उच्चै: अवदत् । एतत् श्रुत्वा पौत्री पितामहीम् अवदत् – "मह्यं किमपि

दापयतु कृपया'' इति।

''वत्से ! गृहे तस्मात् प्राचीनात् पात्रात् ऋते अन्यत् किमपि नास्ति विक्रयणाय। एतस्य मूल्यम् एव नास्ति इति उक्त्वा एकः वणिक् तत् पात्रं क्षिप्त्वा गतवान्। एवं स्थिते किं वस्तु दत्त्वा नूतनं पात्रम् अहं क्रीणीयाम्'' इति खेदेन अवदत् वृद्धा।

''अम्ब ! सः पूर्वतनः वणिक् दुष्टः आसीत्। एतस्य कण्ठस्वरः मधुरः। एषः सौम्यः अस्ति'' इति अवदत् पुत्री।

एतत् श्रुत्वा वृद्धा बोधिसत्त्वं गृहं प्रति निमन्त्रितवती, तत् प्राचीनं पात्रं तस्मै दर्शितवती च। बोधिसत्त्वः तत् परीक्ष्य झटिति अवगतवान् यत् एतत् सुवर्णमयम् एव इति। अतः सः अवदत् – ''अम्ब ! एतत् पात्रं लक्षमुद्रामूल्यम् अर्हति प्रायः। एतदुचितानि वस्तूनि मत्समीपे न सन्ति'' इति।

''वत्स ! इतः पूर्वम् आगतः कश्चन – 'एतत् वराटिकामूल्यम् अपि नार्हति' इति उक्त्वा पात्रं क्षिप्त्वा गतवान्। अतः एतत् स्वीकृत्य भवान् यत् इच्छति तत् दत्त्वा गच्छतु'' इति अवदत् वृद्धा।

बोधिसत्त्वः स्वस्य स्यूततः पञ्चशतं रजतनाणकानि, तावतः एव मूल्यस्य वस्तूनि च तस्यै वृद्धायै समर्प्य – ''आर्ये ! मत्समीपे अष्टौ रजतनाणकानि, एषः स्यूतः, तुला च सन्ति। अन्यानि सर्वाणि वस्तूनि अहं भवत्यै दत्तवान् अस्मि'' इति उक्तवान्। तत् सुवर्णपात्रं स्वीकृत्य ततः निर्गतवान् च।

बोधिसत्त्वः स्वसमीपे यानि अष्टौ रजतनाणकानि रक्षितवान् आसीत् तानि नदीतरणार्थं नाविकाय दातुम्।

बोधिसत्त्वस्य निर्गमनस्य अनन्तरं कृपणः वणिक् पुनरपि तस्याः वृद्धायाः समीपम् आगतवान्। महान्तं त्यागं कुर्वन् इव सः वृद्धाम् अवदत् – ''तत् प्राचीनं पात्रं मह्यं दत्त्वा किमपि एकं वस्तु स्वीकरोतु'' इति।

तदा नितरां क्रुद्धा वृद्धा तम् अवदत् – ''अये, तत् पात्रं वराटिकामूल्यकम् अपि न इति भवान् माम् उक्तवान्। किन्तु कश्चन धर्मात्मा वणिक् अत्र आगत्य सहस्रं रजतनाणकानि दत्त्वा तत् स्वीकृतवान्'' इति।

एतस्य श्रवणात् तस्य कृपणस्य वणिजः मतिः भ्रान्ता इव जाता।

''किं सः लक्षमुद्रामूल्यकं तत् पात्रं वशीकृत्य गतवान् ! अहो, मम महतीं हानिं कल्पितवान् सः !'' इति उच्चैः आक्रोशनं कृतवान् कृपणः वणिक्। आवेशाविष्टः सः रुदन् स्वस्य वस्तूनि सर्वाणि तत्रैव परित्यज्य तुलां गृहीत्वा नदीतटं प्रति धावितवान्। शरीरात् पततः वस्त्रस्य विषये अपि तस्य अवधानं न आसीत्। यावत् सः नदीतीरं प्राप्तवान् तावता बोधिसत्त्वः तीरात् दूरं गतवान् आसीत् नौकया।

कृपणः बोधिसत्त्वम् उच्चैः अवदत् – ''कृपया प्रत्यागच्छतु'' इति। बोधिसत्त्वः तत् अशृण्वन् इव ततः अग्रे अगच्छत्। एतत् दृष्टवतः कृपणवणिजः शरीरं कम्पमानं जातम्। तस्य मुखात् रक्तं निर्गतम्। द्वेषं सोढुम् अशक्नुवतः तस्य शरीरं भूमौ अपतत्। सः तत्रैव प्राणान् अत्यजत्।

ततः बोधिसत्त्वः दानादीनि पुण्यकर्माणि कुर्वन् सुखेन जीवितवान्।

# अभिषेकनाटकम् ( ग्रन्थपरिचयः )

व्योम शाहः

**अनुवर्तते**

महाकविभासप्रणीते अभिषेकनाटके एतावता अस्माभिः दृष्टं यत् सुग्रीववालिनोः भीषणयुद्धे प्रवर्तमाने श्रीरामः प्रच्छन्नः सन् शरं प्रक्षिप्तवान् येन सः वाली हतः। हनुमान् स्वशक्त्या सागरं लङ्घित्वा लङ्कायां प्रमदवनं गत्वा सीतारावणयोः च संवादं श्रुत्वा रामस्य कुशलवार्तां ज्ञापयति। तत्र वने हनुमान् विनाशम् अकरोत्। कैश्चित् सेवकैः सह युद्धानन्तरं सः इन्द्रजिता रावणपुत्रेण पाशेन बद्धः। ततः राजसभायाः हनुमतः निर्गमनं विभीषणस्य सङ्गमः उपवर्णितः दृष्टः। रामेण वरुणदेवः मार्गार्थं प्रार्थितः। सर्वेऽपि लङ्कां प्राप्ताः युद्धं च आरब्धम्।

हनुमान् रामाय निवेदयति – ''**राजस्त्वत्कारणाद् एव भ्रात्रा निर्विषयीकृतः।**
**विभीषणोऽयं धर्मात्मा शरणार्थमुपागतः॥**''

एतत् श्रुत्वा सुग्रीवः रामं प्रत्यादिशत् यत् राक्षसाः मायाविनः, तस्मात् सम्प्रधारणपूर्वकं प्रवेशयितव्यः इति। हनुमान् तं सान्त्वयन् कथयति यत् सः रामस्य पक्षं प्रस्तुवन् तत्र रावणेन सह विवादम् अकरोत् इति। लक्ष्मणः तं सत्करोति प्रवेशयति च विभीषणः रामं दृष्ट्वा शान्तिम् अन्वभवत्। तदैव श्रीरामेण उक्तम् –

''अद्यप्रभृति मद्वचनाल्लङ्केश्वरो भव '' इति। सागरं तीर्त्वा लङ्कां गन्तुम् उपायम् अप्राप्नुवन् विभीषणः पृष्टः। सः सागरं प्रति दिव्यम् अस्त्रं विस्रष्टुं कथयति। ततः वरुणः भगवान् आगम्य लङ्कागमनार्थं रामं समुद्रस्य मध्ये मार्गं प्रदर्शयति। तदैव समुद्रः द्विधाभूतः। सर्वे तेन मार्गेण लङ्काप्रवेशं कुर्वन्ति। रामं छलयितुं रावणेन द्वौ राक्षसौ वानररूपेण प्रेषितौ। विभीषणः तौ ज्ञातवान्। रामः ताभ्यां रावणाय सन्देशं प्रेषितवान्। अनेन चतुर्थाङ्कस्य समाप्तिः भवति।

अत्रान्तरे भीषणं युद्धम् आरब्धम्। तत्र कुम्भकर्णः प्रहस्तः च निहतौ। शत्रुजित् अथ युद्धभूमिं प्राप्तवान्। कञ्चुकीयादेशेन विद्युज्जिह्वः रामलक्ष्मणयोः शिरसः प्रतिकृतिम् आनेतुं गच्छति।

रामलक्ष्मणौ सीतां प्रत्यानेतुम् आगतौ तथाऽपि वेपते तस्याः हृदयम्। तदैव रावणः ताम् अशोकवनिकां प्रविशति। रावणः तां दृष्ट्वा नितरां हृष्टः। सः सीताम् अनुकूलयितुं प्रयत्नं करोति किन्तु सीता स्वनिर्णये तटस्था। तदैव रावणेन सूत्रितस्य प्रपञ्चस्य प्रारम्भः भवति। राक्षसः तत्र प्रविश्य रामलक्ष्मणयोः शिरसी रावणं दर्शयति कथयति च–

**एते तयोर्मानुषयोः शिरसी राजपुत्रयोः। युधि हत्वा कुमारेण गृहीते त्वत्प्रियार्थिना॥**

एतद् दृष्ट्वा श्रुत्वा च सीता खेदम् आप्तवती। तस्याः मनः न विश्वसिति। सा स्वयं प्राणान् त्यक्तुं रावणं कथयति – ''येन असिना आर्यपुत्रस्य असदृशं कृतं, तेन माम् अपि मारय'' इति। यावता रावणः प्रपञ्चं सफलीकर्तुं यत्नं करोति स्म, तदैव राक्षसः अनापृच्छ्य प्रविष्टः राज्ञे निवेदयति – यत् समरे रामलक्ष्माणभ्याम् इन्द्रजित् हतः। रावणस्याऽपि प्रथमं विश्वासः नाऽभवत्। पुत्ररागे मुग्धः सः पुनः पुनः मूर्च्छति। पुत्रे मृत्युम् अवाप्तेऽपि जीवन् रावणः आत्मानं गर्हते। राक्षसः रावणस्य दशां दृष्ट्वा दयते तं च आश्वासयति। रोषाकुलः रावणः स्वकीयभ्रातॄणां पुत्रस्य मृत्योः कारणं सीता इति मन्यमानः तां निहन्तुम् उद्यतः। राक्षसः तं निवारयति। वानरकुलस्य ध्वंसार्थं कृतनिश्चयः रावणः समराय निर्गच्छति।

( क्रमशः... )

# मासवार्त्ता:

## सम्पन्नः प्रमाणपत्रवितरणकार्यक्रमः









एकलव्य-संस्कृत-एकेडेमी बालानां कृते "Value Education through Sanskrit" बालसंस्कृतवर्गः इति अभ्यासक्रमं सञ्चालयति। कार्यक्रमेऽस्मिन् Skg तः आरभ्य ९ कक्ष्यायाः छात्राः आवर्षं सप्ताहे एकवारं रविवासरे संस्कृतभाषायाः अध्ययनं कुर्वन्ति। गतवर्षे ये छात्राः संस्कृतम् अपठन् तान् प्रोत्साहयितुं ओक्टोबरमासस्य २९ दिनाङ्के प्रमाणपत्रवितरणकार्यक्रमः आयोजितः आसीत् । कार्यक्रमेऽस्मिन् डॉ. वैशालीशाहमहोदयायाः (निदेशिका, शेठ सी.एन. विद्याविहारः, अमदावादम्) करकमलाभ्यां छात्रेभ्यः प्रमाणपत्रप्रदानम् अभवत् । प्रमाणपत्रं प्राप्य छात्राः आनन्दिताः आसन्। कार्यक्रमेऽस्मिन् विविधैः कार्यक्रमैः छात्राः स्वकीयां प्रतिभाम् अपि प्रदर्शितवन्तः।

## विदेशीयानां छात्राणां कृते आरब्धौ बालसंस्कृतवर्गौ

संस्कृतं पठितुम् इच्छुकानां विदेशीयच्छात्राणां कृते एकलव्य-संस्कृत-एकेडेमीसंस्थानेन Online संस्कृतवर्गाः आरब्धाः सन्ति । आयोजनेऽस्मिन् बालकानां कृते "Value Education through Sanskrit" बालसंस्कृतवर्गौ आरब्धौ वर्तेते। अभ्यासक्रमेऽस्मिन् अमेरीकादेशस्य केनेडादेशस्य च छात्राः अध्ययनं करिष्यन्ति। अभ्यासक्रमेऽस्मिन् १ कक्ष्यातः ७ कक्ष्यायाः बालकाः आवर्षं सप्ताहे एकवारं संस्कृतभाषायाः अध्ययनं करिष्यन्ति। अत्र उल्लेखनीयं यत् केनेडादेशे एकः offline वर्गः अपि आरब्धः वर्तते। श्रीमती सङ्गीता मिस्त्री, श्रीमती अमी गोहेलः, श्रीमती खञ्जनभचेचः च छात्रेभ्यः मार्गदर्शनं दास्यन्ति।

## आरब्धः "Diploma in Sanskrit Teaching" अभ्यासक्रमः ।



संस्कृतमाध्यमेन संस्कृतं पाठयितुं समर्थानां शिक्षकाणां प्रशिक्षणाय एकलव्य-संस्कृत-एकेडेमी प्रतिवर्षं "Diploma in Sanskrit Teaching" इति अभ्यासक्रमं सञ्चालयति । एतस्मिन् वर्षेऽपि सप्टेम्बरमासस्य ५ दिनाङ्के अभ्यासक्रमोऽयं आरब्धः वर्तते। ३१ छात्राः अभ्यासक्रमेऽस्मिन् प्रवेशं स्वीकृतवन्तः। अभ्यासक्रमोऽयं श्रीसोमनाथ-संस्कृत-विश्वविद्यालयेन सह संलग्नः वर्तते। अभ्यासक्रमेऽस्मिन् छात्राः संस्कृतशिक्षकप्रशिक्षणं ग्रहीष्यन्ति।

## कृपया हसन्तु

**रमण: - (नमनम् उद्दिश्य) भो: एतस्मिन् विषये अहं किं करवाणि ?**

**नमन: - कस्मिन् विषये ?**

**रमण: - यदा अहं मम याने तैलं पूरयितुं पेट्रोलपम्पस्थानकं गच्छामि तदा तत्र लिखितं भवति- "अत्र दूरवाण्या: प्रयोग: निषिद्ध: अस्ति" इति । पुन: तस्य समीपे एव लिखितं भवति "Paytm कुरु" इति । कथयतु इदानीं मया किं कर्तव्यम् ?**

★ ★ ★ ★ ★

**पत्नी - (पतिम् उद्दिश्य) एतत् शाकं कुत: आनीतवान् भवान् ?**

**पति: - किमर्थम् एवं पृच्छति ? किं जातम् ?**

**पत्नी - किं जातम् इति ? सम्पूर्णं शाकं ज्वलितं, भस्मीभूतं च । भवान् सम्यक् शाकं क्रेतुम् अपि न जानाति ?**

★ ★ ★ ★ ★

**नमन: - (रमणम् उद्दिश्य) मया अद्य रुग्णालय: गन्तव्य: अस्ति ।**

**रमण: - किमर्थम् ? किम् अभवत् ?**

**नमन: - प्रतिदिनं प्रात: उत्थानानन्तरम् अर्धघण्टां यावत् मम शिरोवेदना भवति ।**

**रमण: - भो: एदर्थं रुग्णालयं किमर्थं गच्छति भवान् ? श्व: आरभ्य अर्धघण्टां विलम्बेन उत्तिष्ठतु ।**

## सुभाषितम्

– संस्कृतविकिपीडियाजालस्थानात्

**यथा बीजं विना क्षेत्रम् उप्तं भवति निष्फलम् ।**
**तथा पुरुषकारेण विना दैवं न सिद्ध्यति ॥**

**तात्पर्यम्** – यदि कृषकस्य समीपे बीजं न भवति तर्हि भूमौ स: बीजं वप्तुं न शक्नोति। तथैव परिश्रमेण विना कोऽपि भगवत: अनुग्रहं प्राप्तुं न शक्नोति।

**यथा ह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।**
**एवं पुरुषकारेण विना दैवं न सिद्ध्यति ॥**

**तात्पर्यम्** – पुरुषप्रयत्न: दैवञ्च जीवनस्य चक्रद्वयमिव । एकेन चक्रेण यथा रथ: न सञ्चरेत् तथा पुरुषप्रयत्नेन विना दैवमपि न सिद्ध्यति।

**यथादित्य: समुद्यन् वै तम: पूर्वं व्यपोहति ।**
**एवं कल्याणमातिष्ठन् सर्वपापै: प्रमुच्यते ॥**

**तात्पर्यम्** – जगत्कल्याणेच्छया उदियमानस्य सूर्यस्य आगमनसमनन्तरमेव परित: आवृत: अन्धकार: नश्यति। तथा जलकल्याणकार्ये व्यापृत: जन: सर्वेभ्य: पापेभ्य: मुक्त: भविष्यति।

## ज्ञानसरित्

श्यामः पटेलः



**वानरेषु धीमान् – ''केपूचिन''** – जीवसृष्टौ मनुष्यात् परः वानरः एव बुद्धिमान् इति सर्वैः अङ्गीक्रियते। किन्तु वानराणाम् अनेकाः प्रजातयः वर्तन्ते। तेषां सर्वेषाम् आकृतौ वर्णे च वैशिष्ट्यं भवति। तेषु वानरेषु अन्यतमः अस्ति – केपूचिन–आख्यः वानरः। सः एव वानरेषु महान् बुद्धिमान्। आकृतौ लघुः भाति। किन्तु चतुरः। एते वानराः नैकेषु आङ्ग्ल–चलचित्रेषु अभिनयं कुर्वन्ति। केपूचिन–वानरः शरीरेण कृष्णवर्णीयः धूमवर्णीयः वा भवति। तस्य स्कन्धौ मुखं च काषायवर्णीयं भवति। अन्यासां वानरप्रजातीनाम् अपेक्षया एतस्य पुच्छः सुदीर्घः भवति। वानरोऽयं वनस्पतिम् अतिरिच्य मत्स्यं लघुकीटकान् च खादति। अमेरिकामहाद्वीपस्य मध्यदक्षिणभागयोः वनेषु दृश्यमानस्य वानरस्य आयुः पञ्चदशतः पञ्चविंशतिवर्षपर्यन्तं भवति। मनोविज्ञानस्य जीवविज्ञानस्य च प्रयोगेषु अस्य वानरस्य उपयोगः अधिकः अस्ति। केपूचिन–वानरस्य प्रशिक्षणं भवति तदा झटिति सर्वं शिक्षते। यष्टिपाषाणयोः शस्त्ररूपेण प्रयोगं कर्तुं शक्नोति। अक्षोटं वातामफलं च त्रोटयितुं वानरोऽयं पाषाणखण्डानां सङ्ग्रहं करोति। चतुरोऽयं विशिष्टौषधीनां पर्णानि शरीरे मर्दयित्वा मशकेभ्यः आत्मानं रक्षति।

एते वानराः शान्तिप्रियाः सन्ति। समूहे निवसन्तः एते स्वप्रदेशे एव वसन्ति। कौटुम्बिकभावनया स्वस्य कुटुम्बस्य पोषणं रक्षणं च कुर्वन्ति।

अक्षोटः – walnut, वातामफलम् – almond

## शब्दमञ्जूषा

| | | |
|---|---|---|
| **भ्रंशः** | नाश | destruction |
| **आहवः** | युद्ध | battle |
| **भर्त्सनम्** | निन्दा | censure |
| **धवः** | पति | husband |
| **मृगदंशकः** | कुत्ता | dog |
| **भसितम्** | राख | ashes |
| **जनिः** | जन्म | birth |
| **भर्म** | सुवर्ण | gold |
| **विततम्** | फैला हुआ | spread out |
| **वितण्डः** | हाथी | elephant |
| **अवतंसः** | माला | garland |
| **अवततिः** | खींचना | extending |
| **अर्णवः** | समुद्र | ocean |
| **तमिस्त्रम्** | अंधकार | darkness |
| **तमस्विनी** | रात्रि | night |

## किं भवन्तः जानन्ति ?

**१) चैतन्यमहाप्रभोः जन्म बङ्गालराज्यस्य कस्मिन् नगरे अभवत्?**
(क) वीरभूम (ख) नदिया (ग) सिंहभूम (घ) पुरुलिया

**२) भगवान् बुद्धः एतेषु कुत्र निर्वाणं प्राप्तवान् आसीत्?**
(क) कुशीनगरे (ख) सारनाथे (ग) वाराणस्याम् (घ) गयायाम्

**३) भगवान् महावीरः एतेषु कुत्र निर्वाणं प्राप्तवान् आसीत्?**
(क) वाराणस्याम् (ख) सारनाथे (ग) पावापुर्याम् (घ) गयायाम्

**४) पवित्रं तीर्थं कन्याकुमारी भारतस्य कस्यां दिशि वर्तते?**
(क) उत्तरदिशि (ख) पूर्वदिशि (ग) दक्षिणदिशि (घ) पश्चिमदिशि

**५) विवेकानन्दस्य जन्म कस्मिन् प्रान्ते अभवत्?**
(क) गुजरात (ख) बङ्गाल (ग) महाराष्ट्र (घ) बिहार

**६) भागीरथी, वृद्धगङ्गा, कालिन्दी, सरस्वती, कावेरी, नर्मदा, वेणी इत्येताः काः कथ्यन्ते?**
(क) सप्तपुरी (ख) सप्तक्षेत्रम् (ग) सप्तगङ्गाः (घ) सप्तसरोवरः

**७) 'रामशय्या' गुहाः कुत्र वर्तन्ते?**
(क) खजुराहोस्थाने (ख) नालन्दायाम् (ग) नासिके (घ) तक्षशिलायाम्

उत्तराणि – (१) ख (२) क (३) ग (४) ग (५) ख (६) ग (७) ग

## अस्माकम् आगामिकार्यक्रमाः

EKLAVYA SANSKRIT ACADEMY

# दीपावलीवर्गः

**(6 Nov 2024 to 16 Nov 2024)**

## संस्कृतव्याकरणम्

(Class 9-10)

8am to 9:30am

3000/-

## बालसंस्कृतवर्गः

(Class 1 to 8)

10am to 11:30am

2500/-

**contact: Dr Mihir Upadhyay, 98246 16237**

EKLAVYA SANSKRIT ACADEMY

## Value Education Through Sanskrit

## बालसंस्कृतवर्गः

**(Class SKg to 8)**

**Offline**

**Date :** 23/11/24 to 29/3/25

**Day :** Saturday

**Time :** 6:00pm to 7.30pm

**Fees :** 4000/-

**contact: Dr Mihir Upadhyay, 98246 16237**

### संस्कृत-साम्प्रतम्

नमस्कारः

यदि भवन्तः "साम्प्रतम्" मासिकीपत्रिकायाः ग्राहकाः भवितुम् इच्छन्ति तर्हि अधोलिखिते सङ्केते धनं प्रेषयन्तु ।

**ग्राहक शुल्कम्**

| | |
|---|---|
| वार्षिकं रू | - 100 |
| द्वैवार्षिकं रू | - 175 |
| त्रैवार्षिकं रू | - 250 |
| अङ्कमूल्यं रू | - 10 |





**सर्वेभ्यः पाठकेभ्यः**
**दीपावल्याः शुभकामनाः**
**नूतनवर्षाभिनन्दनानि च ।**

**- सम्पादकः**

**प्रियवाचकाः**

- भवतां समीपे यदि पत्रिकायां प्रकाशनयोग्याः लेखाः, कथाः, हास्यकणिकाः वा सन्ति तर्हि कृपया प्रेषयन्तु ।
- पत्रिकायाः विषये सूचनम् अपि स्वीकार्यम् अस्ति ।

EKLAVYA SANSKRIT ACADEMY
|| जयतु संस्कृतं जयतु भारतम् ||

**Published, Printed and Edited by Dr. Mihir Upadhyay**
For. Eklavya Sanskrit Academy
Core House, Off CG Road
Ahmedabad 380 006 India
**Fax:** (91) 79 26563681
**Mobile:** (91) 98246 16237
**e-mail:** mihiresa@gmail.com
**web:** www.eklavyasanskritacademy.org

Printed at :- Print Vision Private Limited, Print Vision House, Jay Gujarat Fruit Lane, Ambawadi Market, Ahmedabad, Gujarat 380006